
# वीरभटानां महाप्रयाणे शोभायात्रा अमरज्योति:प्रज्वालनञ्च



पुष्पं न कांक्षति कदाप्यवलासुकण्ठं,
नैवापि हारवलयं सुरभूषणत्वम् ।
येनाध्वना भुवनवीरगणारसून् स्वान्
त्यक्त्वा गतास्तदुपकांक्षति पुण्यमार्गम् ।।

महत: दु:खस्य विषयोऽयं यत् विगते १४.०२.२०१९ दिनाङ्के जम्मु-श्रीनगरजातीयराजपथे पुल्वामाजिल्लाया: लेथपोरानामके स्थाने सैन्यवाहिनीयानस्योपरि आतङ्कविस्फोटनेन चत्वारिंशत् CRPF सैनिका: वीरगतिम् अवाप्नुवन् । अनेन विश्वस्मिन् विश्वे सर्वत्र मर्मन्तुदशोकप्रवाह: अवलोकित: । तेषां वीरभटानां कृते अश्रुलश्रद्धाञ्जलिप्रदानपूर्वकं विद्यापीठीया: सर्वेऽपि कुलपति-कुलसचिव-शैक्षिकसङ्कायप्रमुखसमेता: अध्यापका: कर्मचारिण:, अन्तेवासिन:, अन्तेवासिन्यश्च प्रदीपज्योति:प्रज्वालनं कृत्वा शोभायात्रामकुर्वन् ; शोकाकुलपरिवेशे वीरभटानां महाप्रयाणयात्रामार्गे पुष्पाञ्जलि-समर्पणपूर्वकं विद्यापीठपक्षत: तेषां परिवारसदस्यानां कृते सदिच्छां व्यतानिषु: ।






राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः


राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः




राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपति:




राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः